# Bhillakanyakrita Shiva Stuti

# ભિલ્લકન્યાકૃતા શિવસ્તુતિઃ

## Document Information

Text title : Bhillakanyakrita Shiva Stuti

File name : bhillakanyAkRRitAshivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 29 | 103-129 ||

Latest update : February 1, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2024

*sanskritdocuments.org*

# ભિલ્લકન્યાકૃતા શિવસ્તુતિઃ

દાતા ત્વમેવ ભગવાન્ વિશ્વસ્ય સકલસ્ય ચ ।
પાલકો નાશકશ્ચ ત્વં જનકોઽપિ સંશયઃ ॥ ૧૦૩॥

ભૂમણ્ડલોત્પાદનકારણાય તત્પાલનસ્યાપ્યથ કારણાય ।
તન્નાશકાયાપિ નમો નમસ્તે ગૌરીસહાયાય મહેશ્વરાય ॥ ૧૦૪॥

અપારસંસારવિનાશકાય સંસારદુઃખપ્રલયોદ્યતાય ।
નમોઽસ્તુ તે કારણકારણાયાપ્યકારણાયાપિ નમો નમસ્તે ॥ ૧૦૫॥

વેદાન્તવેદ્યાય નમો નમસ્તે વેદસ્વરૂપાય નમો નમસ્તે ।
અપારકલ્યાણગુણાર્ણવાય નમો નમસ્તે ગિરિજાસહાય ॥ ૧૦૬॥

નમો નમશ્ચન્દ્રકલાવતંસ ગૌરીસ્ફુરન્માનસરાજહંસ ।
ગૌરીવિહારોન્નતકન્ધરાંસ નમો નમો બિલ્વવરોત્તમાંસ ॥ ૧૦૭॥

કશ્ચન્દ્રચૂડચરણામ્બુરુહાર્ચનેન
નાભીષ્ટસિદ્ધિમસકૃત્ સમવાપ રૂપમ્ ।
શૈવં સમેત્ય નવબિલ્વદલાઙ્કુરૈર્વા
લિઙ્ગાર્ચનેન વિજયે રજનીમુખે વા ॥ ૧૦૮॥

પ્રદોષે બિલ્વં વા યદિ નવજલેનાપિ સહિત
પ્રદદ્યાદ્યો ભક્ત્યા સિતમસિતલિઙ્ગેઽપિ વિમલમ્ ।
સ તાવત્સર્વેષામપિ ભવતિ પૂજ્યો જનિજરા-
વિનાશાનાં દુઃખં પરિહરતિ દૃષ્ટોઽપિ સહસા ॥ ૧૦૯॥

પુણ્યાનિ તાવન્ન પુરા કૃતાનિ યત્તત્સ્મરારિસ્મરણં ન પૂર્વમ્ ।
અદ્યાપિ તાવન્ન કૃતાનિ પુણ્યાન્યથાપિ લિઙ્ગં નયનાતિથિર્મે ॥ ૧૧૦॥

અલં પુણ્યભારૈરલં યોગદાનૈઃ અલં સર્વભૂમણ્ડલાવર્તનૈર્વા ।
યદા શર્વલિઙ્ગં નવૈર્બિલ્વપત્રૈઃ પવિત્રૈઃ પ્રસન્નં તદા તૈશ્ચ કિં વા ॥ ૧૧૧॥

અહો મહદ્ભાગ્યમિદં વનેઽસ્મિન્ વૃષ્ટિપ્રસઙ્ગાદપિ શાઙ્ગલિઙ્ગમ્ ।
દૃષ્ટં મમ પ્રાણવિયોગકાલે ન ભાવિકાલાદ્ભયમલ્પતોઽપિ ॥ ૧૧૨॥

સકૃદપ્યવલોકિતો મહેશઃ શિવલિઙ્ગેષુ સમર્ચિતોઽતિભક્ત્યા ।
કૃતકૃત્યવરં કરોતિ મર્ત્યં સ કૃતાન્તોઽપિ બિભેતિ તેજ નૂનમ્ ॥ ૧૧૩॥

કૃતાન્તાન્તકં કઃ પ્રપૂજ્યાતિભક્ત્યા નવૈર્બિલ્પત્રૈર્જલૈર્વા ફલૈર્વા ।
સ યાતીશપાદારવિન્દદ્વિરેફસ્વભાવો ભવામ્ભોધિરાશેશ્ચ પારમ્ ॥ ૧૧૪॥

પ્રપન્નાર્તિનિર્વાપણે શક્તમેકં મહાદેવમેકં પ્રપદ્યે મહેશમ્ ।
વિશેષેણ માતા પિતા બન્ધુરેવ પ્રકૃષ્ટાનિ કષ્ટાનિ દૂરીકરોતિ ॥ ૧૧૫॥

અનાયાસલભ્યૈવ મુક્તિર્મહેશે શ્રુતેઽપિ સ્મૃતેઽપીતિ મન્યે તદન્યઃ ।
ન કોપ્યસ્તિ ભક્તાર્તિસંહારહેતુઃ સ સેતુઃ સુખાનાં સ કેતુર્મખાનામ્ ॥ ૧૧૬॥

મહેશં ભજન્તઃ સ્મરન્તઃ સકૃદ્વા ન સંસારભીતિં પ્રપશ્યન્તિ કાલમ્ ।
ન પશ્યન્તિ દુઃખાનિ કાન્યપ્યતો હિ મહેશં વિનાન્યં ન જાને ન જાને ॥ ૧૧૭॥

જનિસ્તેન તાવદ્ભવત્યેવ તેન સ્થિતિસ્તેન સંહારકાલે સમાપ્તિઃ ।
સમસ્તસ્ય લોકસ્ય તસ્યાધુનાઽહં પ્રપશ્યામિ લિઙ્ગં કૃતાનઙ્ગભઙ્ગમ્ ॥ ૧૧૮॥

ગ્રહાસ્તાવદદ્યાધુના મે પ્રસન્નાઃ પુનસ્તાવદેકાદશસ્થાનયુક્તાઃ ।
સમસ્તાશ્ચ તે તેન ઘોરે વનેઽસ્મિન્ પ્રકૃષ્ટં હિ લિઙ્ગં મયા દૃષ્ટમેવ ॥ ૧૧૯॥

વિનષ્ટાનિ કષ્ટાનિ દુઃખપ્રવાહઃ ક્ષણેનૈવ નષ્ટો ગતા વૃષ્ટિરેષા ।
ઇદં લિઙ્ગમપ્યમ્બુના સિક્તમેવં નવં બિલ્વપત્રં વહત્યાશુ દત્તમ્ ॥ ૧૨૦॥

અનેનૈવ દત્તેન બિલ્વેન પાપં પ્રણષ્ટં પ્રકૃષ્ટં સુખં દાતુમેવ ।
સમર્થં ન સન્દેહવાર્તાપિ ધન્યં શરીરં મમેદં તથા જીવનં ચ ॥ ૧૨૧॥

બિલ્વાઙ્કુરેણ ગિરિજારમણઃ કથં વા પ્રીતો ભવત્યઘવિનાશકરઃ કથં વા ।
મુક્તિપ્રયાવિતરણપ્રવણઃ કથં વા વેદો ન વેદ તદયં શિવકૌતુકાનિ ॥ ૧૨૨॥

ધુત્તૂરપુષ્પમપિ કેતકપુષ્પતુલ્યં કૃત્વા જપાકુસુમમપ્યપરાધિનાપિ ।
ગૃહ્ણાતિં દત્તમસકૃત્ સકૃદેવ વાઽયં કિં કૌતુકં તદિદમિત્યપિ નૈવ વિદ્મઃ ॥ ૧૨૩॥

કિં કણ્ટકારિકુસુમાન્યપિ કૌતુકેન ગૃહ્ણાતિ કિં કુશદલાન્યપિ કિ શુભાનિ ।
ભક્તાભિતાપહરણાય જલાનિ ગૃહ્ણાત્યલ્પાનિ તાન્યભિનવાન્યનવાનિ વાઽયમ્ ॥ ૧૨૪॥

કલ્યાણસાગર ઇતિ પ્રથિતો હરોઽયં સર્વાઘરાશિહરણાત્ સ હરો વરોઽયમ્ ।
તં તાદૃશં ગિરિસુતાપતિમાશ્રયેઽહં ભક્તેપ્સિતાર્થદમપારસુખપ્રવાહૈઃ ॥ ૧૨૫॥

આલોડ્ય ચૈવ ચિરમેવ મયાપિ લોકે નિર્ણીતમીશચરણામ્બુજમાદરેણ ।
સંસેવનીયમખિલાઘવિનાશનાય ગૌરીપતિં ચિરમહં હૃદિ ભાવયામિ ॥ ૧૨૬॥

ગૌરીકુચોરુગિરિશેખરચારુહીર હારસ્ફુરદ્ગિરિશપાદસરોજભૃઙ્ગૈઃ ।
મન્માનસં ભવતુ તેન વિમુક્તિરસ્ય સમ્ભાવિતાપિ જગતામપિ માનનીયઃ ॥ ૧૨૭॥

મદીયસુકૃતાપારપારાવારૈર્મહેશ્વરઃ ।
કુલદૈવતમસ્માકં અકસ્માદભવત્ કથમ્ ॥ ૧૨૮॥

ક્વાહં ક્વ વા વૃષ્ટિરિયં પ્રભૂતા સન્તોષરૂપા શિવદર્શનેન ।
અલં કૃતાર્થં મમ માનસં મે કૃત્યં ચ નાતઃ પરમસ્તિ લોકે ॥ ૧૨૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભિલ્લકન્યાકૃતા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૨૯। ૧૦૩-૧૨૯॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 29. 103-129..

Notes:
Bhillakanyā ભિલ્લકન્યા; who has taken shelter due to rains, in a Śiva temple શિવમન્દિર, eulogizes and prays to Śiva શિવ.

Proofread by Ruma Dewan

*Bhillakanyakrita Shiva Stuti*

pdf was typeset on June 17, 2024

Please send corrections to *sanskrit@cheerful.com*